तस्यैवाप्रतिबन्धकरणेन ‘साहचर्य्यानुष्ठानेन वा केनचिदनुग्राहकादित्यवगन्तव्यम्। तस्मात् सूक्ष्ममातिवाहिकादेव तात्मानोऽर्चिरादय इति” शाङ्करभाष्यम्।

अतिवाहे अतिवाहकाले इतोलोकान्तरगतिकाले भवः ठञ्। मनुष्याणां मृत्युकालभवे २ देहभेदे पु० शरीरविशेषणत्वे न०। “तत्क्षणादेव गृह्णाति शरीरमातिवाहिकम्। ऊर्द्ध्वं व्रजन्ति भूतानि त्रीण्यस्मात्तस्य विग्रहात्”। विष्णुध०। त्रीणि भूतानि तेजोवाय्वाकाशानि ऊर्द्ध्वं गच्छन्ति गुरुत्वाभावात् पृथिवीजले तु गुरुत्वादधोगच्छत इत्यभिप्रायः तत्क्षणात् मृत्युक्षणं प्राप्येत्यर्थः “आतिवाहिकसंज्ञोऽसौ देहो भवति भार्गव! केवलं तन्मनुष्याणां नान्येषां प्राणिनां क्वचित्”। इति च तत्रैवोक्तम्। पञ्चभूतानामूर्द्धाधोगतिश्च स्थूलभूतविषया सूक्ष्माणान्तु लिङ्गशरीराश्रयतया सर्वजीवानां देहान्तरप्राप्तौ तद्देहारम्भसाधनतया सहैव गमनम् यथाह “तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्याम्” शा० सू० व्याख्यातमिदं शङ्कराचार्य्यैः “जीवोमुख्यप्राणसचिवः सेन्द्रियः समनस्कोविद्याकर्म्मपूर्व्वप्रज्ञापरिग्रहः पूर्व्वदेहं विहाय देहान्तरं प्रतिपद्यत इत्येतदवगतं अथैनमेते प्राणा अभिसमायन्तीत्येवमादेरन्यन्नवतरं रूपं कुरुते इत्येवमन्तात् संसारप्रकरणस्थाच्छब्दात् धर्म्माधर्म्मफलोपभोगसम्भवाच्च। स किं देहवीजैर्भूतसूक्ष्मैरसंपरिष्वक्तो गच्छति आहोस्वित् संपरिष्वक्त इति चिन्त्यते किं तावत् प्राप्तं असंपरिष्वक्त इति। कुतः करणोपादानवत् भूतोपादानस्याश्रुतत्वात्। ‘स एतास्तेजोमात्राः समभ्याददानः” इत्यत्र तेजोमात्राशब्देन करणानामुपादानं संकीर्त्तयति वाक्यशेषे चक्षुरादिसंकीर्त्तनात्। नैवं भूतमात्रोपादानसंकीर्त्तनमस्ति सुलभाश्च सर्व्वत्र भूतमात्रा यत्रैव देह आरब्धव्यस्तत्रैव सन्तीति ततश्च तासां नयनं निष्प्रयोजनम्। तस्मादसंपरिष्वक्तोयातीत्येवं प्राप्ते पठत्याचार्य्यः “तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्त” इति। तदन्तरप्रतिपत्तौ देहात् देहान्तरप्रतिपत्तौ देहवीजैर्भूतसूक्ष्मैः संपरिष्वक्तो गच्छतीत्यवगन्तव्यं कुतः प्रश्ननिरूपणाभ्याम्। तथा हि प्रश्नः “वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्तीति”। निरूपणञ्च प्रतिवचनं द्युपर्ज्जन्यपृथिवीपुरुषयोषित्सु पञ्चस्वग्निषु श्रद्धासोमवृष्ट्यन्नरेतोरूपाः पञ्चाहुतीर्दर्शयित्वा ‘इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्तीति”। तस्मादद्भिः परिवेष्टितो जीवोरंहतीति गम्यते। नन्वन्या श्रुतिर्जलौकावत् पूर्व्वं देहं न मुञ्चति यावद्देहान्तरं न क्रामतीति दर्शयति तद्यथा तृणजलायुकेति तत्राप्परिवेष्टितस्यैव जीवस्य कर्म्मोपस्थापितप्रतिपत्तव्यदेहविषयभावाय दीर्घीभावमात्रं जलौकयोपमीयत इत्यविरोधः। एवं श्रुत्युक्ते देहान्तरप्रतिपत्तिप्रकारे सति याः पुरुषमतिप्रभवाः कल्पनाः व्यापिनां करणानामात्मनश्च देहान्तरप्रतिपत्तौ कर्म्मवशाद्वृत्तिलाभस्तत्र तत्र भवति केवलस्यैव वात्मनोवृत्तिलाभस्तत्र तत्र भवति। इन्द्रियाणि तु देहवदभिनवान्येव तत्र तत्र भोगस्थान उत्पद्यन्ते, मनएव वा केवलं भोगस्थानमभिप्रतिष्ठते जीव एवं वा उत्प्लुत्य देहाद्देहान्तरं प्रतिपद्यते शुकइव वृक्षाद्वृक्षान्तरमित्येवमाद्याः, ताः सर्व्वाएवानादर्त्तव्याः श्रुतिविरोधात्। ननूदाहृताभ्यां प्रश्नप्रतिवचनाभ्यां केवलाभिरद्भिः संपरिष्वक्तो रंहति इति प्राप्नोति अप्शब्दश्रवणसामर्थ्यात् तत्र कथं सामान्येन प्रतिज्ञायते सर्व्वैरेव भूतसूक्ष्मैः संपरिष्वक्तो रंहतीत्यतउत्तरं पठति। “त्र्यात्मकत्वात्तु भूयस्त्वात्” सू०। “तुशब्देन चोदितामाशङ्कामुच्छिनत्ति त्र्यात्मिका ह्यापः त्रिवृत्करणश्रुतेः तास्वारम्भिकास्वभ्युपगतास्वितरदपि भूतद्वयमवश्याभ्युपगन्तव्यं भवति त्र्यात्मकश्च देहः त्रयाणामपि तेजोबन्नानां तस्मिन् कार्य्योपलब्धेः पुनश्च त्र्यात्मकः त्रिधातुकत्वात् त्रिभिर्वातपित्तश्लेष्मभिर्व्याप्तत्वात् न स भूतान्तराणि प्रत्याख्याय केवलाभिरद्भिरारब्धुं शक्यते। तस्माद्भूयस्त्वापेक्षोऽयम् “आपः पुरुषवचसइति” प्रश्नप्रतिवचनयोरप्शब्दो न कैवल्यापेक्षः सर्व्वदेहेषु हि रसलोहितादिद्रवभूयस्त्वं दृश्यते। ननु पार्थिवोधातुर्भूयिष्ठोदेहेषूपलक्ष्यते नैष दोषः इतरापेक्षयापां बाहुल्यं भविष्यति दृश्यते च शुक्रशोणितलक्षणेऽपि देहवीजे द्रवबाहुल्यम्। कर्म्म च निमित्तं कारणं देहान्तरारम्भे कर्म्माणि चाग्निहोत्रादीनि सोमाज्यपयःप्रभृतिद्रवद्रव्यव्यपाश्रयाणि कर्म्मसमवायिन्यश्चापः श्रद्धाशब्दोदिताः सह कर्म्मिभिर्द्युलोकाख्येऽग्नौ हूयन्त इति वक्ष्यति तस्मादप्यपां बाहुल्य प्रसिद्धिः। बाहुल्याच्चाप्शब्देन सर्व्वेषामेव देहवीजानां भूतसूक्ष्माणामुपादानमिति निरवद्यम्। “प्राणगतेश्च” सू० “प्राणानाञ्च देहान्तरप्रतिपत्तौ गतिः श्राव्यते “तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तं सर्व्वे प्राणा अनूत्क्रामन्तीत्यादि” श्रुतिभिः। सा च प्राणानां गतिर्नाश्रयमन्तरेण सम्भवतीत्यतः प्राणगतिप्रयुक्तानां तदाश्रयभूतानामपामपि भूतान्तरोपसृष्टानां गतिरवगम्यते। न हि निराश्रयाः प्राणाः क्वचिद्गच्छन्ति तिष्ठन्ति वा जीवतोऽदर्शनात्”